श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ६०

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः
श्रीमते कृष्णाय परब्रह्मणे नमः
श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ६०

*गोपीवस्त्रापहरणवर्णनम्*

मदनातुरचेतसोऽन्वहं
भवदङ्घ्रिद्वयदास्यकाम्यया।
यमुनातटसीम्नि सैकतीं
तरलाक्ष्यो गिरिजां समार्चिचन्॥ १ ॥

तव नामकथारताः समं
सुदृशः प्रातरुपागता नदीम्।
उपहारशतैरपूजयन्
दयितो नन्दसुतो भवेदिति॥ २ ॥

इति मासमुपाहितव्रता-
स्तरलाक्षीरभिवीक्ष्य ता भवान्।
करुणामृदुलो नदीतटं
समयासीत्तदनुग्रहेच्छया॥ ३ ॥

नियमावसितौ निजाम्बरं
तटसीमन्यवमुच्य तास्तदा।
यमुनाजलखेलनाकुलाः
पुरतस्त्वामवलोक्य लज्जिताः॥ ४ ॥

त्रपया नमिताननास्वथो
वनितास्वम्बरजालमन्तिके।
निहितं परिगृह्य भूरुहो
विटपं त्वं तरसाऽधिरूढवान्॥ ५ ॥

www.prapatti.com

इह तावदुपेत्य नीयतां
वसनं वः सुदृशो यथायथम्।
इति नर्ममृदुस्मिते त्वयि
ब्रुवति व्यामुमुहे वधूजनैः॥ ६ ॥

अयि जीव चिरं किशोर न-
स्तव दासीरवशीकरोषि किम्।
प्रदिशाम्बरमम्बुजेक्षणे-
त्युदितस्त्वं स्मितमेव दत्तवान्॥ ७ ॥

अधिरुह्य तटं कृताञ्जलीः
परिशुद्धाः स्वगतीर्निरीक्ष्य ताः।
वसनान्यखिलान्यनुग्रहं
पुनरेवं गिरमप्यदा मुदा॥ ८ ॥

विदितं ननु वो मनीषितं
वदितारस्त्विह योग्यमुत्तरम्।
यमुनापुलिने सचन्द्रिकाः
क्षणदा इत्यबलास्त्वमूचिवान्॥ ९ ॥

उपकर्ण्य भवन्मुखच्युतं
मधुनिष्यन्दि वचो मृगीदृशः।
प्रणयादयि वीक्ष्य वीक्ष्य ते
वदनाब्जं शनकैर्गृहं गताः॥ १० ॥

इति नन्वनुगृह्य वल्लवी-
र्विपिनान्तेषु पुरेव सञ्चरन्।
करुणाशिशिरो हरे हर
त्वरया मे सकलामयावलिम्॥ ११ ॥

**********